IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# जगन्नाथदिशा कविप्रतिभाविमर्शनम्

**डा. ई. प्रकाशः**

प्राचार्यः, कालिकट् आदर्शसंस्कृतविद्यापीठम्, बालुश्शेरी

विश्वेऽस्मिन् सर्वमपि कार्यं कारणपराधीनमेवेति निर्विवादम्। यतो हि विना इष्टिकाभिः कोऽपि प्रासादः न निर्मीयते। न वा विना तन्तुभिः पट उत्पाद्यते। मृदादिद्रव्यमनपेक्ष्य निष्पन्नो घटोऽपि क्वचित् दृश्यते। अतः सर्वमपि कार्यं कारणपरतन्त्रमेव। काव्यमपि धर्ममेनं नातिक्रामति। अतः किं नाम काव्यकारणमिति जिज्ञासा मनसि समुदेति। प्रश्नोऽयं भामहादिभिः प्राचीनैरालङ्कारिकैः तथा च विश्वनाथ-जगन्नाथादिभिर्नवीनालङ्कारिकैश्च समाहितः। अत्राधुना पण्डितराजजगन्नाथस्य सिद्धान्त एव विस्तरेण परिशीलनीयो वर्तते।

जगन्नाथदिशा कविप्रतिभावैलक्ष्यण्यविचार इति विषयावतरणात्प्राक् पूर्वतनानां दण्डिभामहप्रभृतीनां काव्यकारणविषये का चिन्ता आसीदिति दिङ्मात्रावलोकनमनौचित्यं न भजते इति मन्ये। तत्र दण्डी कथयति-

**नैसर्गिकी च प्रतिभा श्रुतञ्च बहु निर्मलम्।**

**अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः** ॥ इति ।

अत्र काव्यकारणं तावत् प्रतिभा-व्युत्पत्त्यभ्यासानां समुदितरूपमेव। तस्मादुक्तं कारणमित्येकवचनम्। काव्यालङ्कारसूत्रवृत्तिकारो वामनः काव्यकारणधिकृत्ये कथयन्नेवमाह— **“लोको विद्या प्रकीर्णञ्च काव्याङ्गानि”** इति। अत्र सूत्रे त्रीणि काव्याङ्गानि प्राध्यानेन निर्दिष्टानि। **“त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः”** इति रुद्रटवचनमपि दण्डिमतानुसार्येव।
भामहेन तु—

**गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।**

**काव्यन्तु जायते जातु कस्यचित्प्रतिभावतः** ॥ इति प्रोक्तम्।

प्राचीनानां दण्डिभामहप्रभृतीनां प्रतिभानं प्रतिभेत्यादिरेव व्यवहारः। प्रतिभा एव शक्तिः। अत एव **“अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः”** इत्यानन्दवर्धनोक्तिं स्पष्टीकुर्वन् अभिनवगुप्तः प्राह- [४]**“शक्तिः प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्”** इति। मम्मटेन सा शक्तिः कवित्वबीजरूपसंस्कारविशेषत्वेन स्वीकृता ।

कवित्वबीजरूपसंस्कारविशेषः एतज्जन्मीयदेवतामहापुरुषप्रसादजन्यो वा जन्मान्तरीयसंस्कारविशेषो वा भवितुमर्हति। जगन्नाथेन जन्मान्तरीयकल्पनं गौरवात् मानाभावान्नानुमन्यते। तदन्यत्। दण्डिना चोच्यते-

**न विद्यते यद्यपि पूर्ववासना-**

**गुणानुबन्धि प्रतिभानमद्भुतम्।**

**श्रुतेन यत्नेन च वागुपासिता**

**ध्रुवं करोत्येव कमप्यनुग्रहम्** ॥ इति।

एवं वदता दण्डिना जन्मान्तरसंस्कारसमुत्पन्नायाः प्रतिभायाः अभावेऽपि निर्मलशास्त्रज्ञानेन निरन्तरकाव्याभ्यासेन चावश्यं सरस्वत्याः अनुग्रहः अर्थात् काव्यनिर्माणं सम्पाद्यत इति स्पष्टतया उक्तम्।

रुद्रटो शक्तिमेवं निरूपयति- [6]"**मनसि सदा सुसमाधिविस्फुरणमनेकधाभिधेयस्य अक्लिष्टानि च पदानि विभान्ति यस्यामसौ शक्तिः**" इति। काव्यघटनानुकूलशब्दार्थविस्फूर्तेः कारणं शक्तिरिति केचन। केचन तादृशविस्फूर्तिमेव प्रतिभामाहुः। यथा जगन्नाथः [7]"**काव्यघटनानुकूलशब्दार्थोपस्थितिः शक्तिः**" इति। शक्त्यभिन्ना चेयं प्रतिभा भर्तृहरिणा एवं प्रतिपादिता। तस्याः बहवः प्रभेदाः तेनैव दर्शिताः। यथा-

**विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।**

**वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्॥**

**प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति ।**

**समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्॥**

**स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।**

**जन्त्वादयः कुलायादिकरणे केन शिक्षिताः॥**

**आहारप्रीत्यभिद्वेषप्लवनादिक्रियासु कः।**

**जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम्॥**

**स्वभावाचरणाभ्यासयोगादृष्टोपपादिताम्।**

**विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः॥** इति॥

न्यायमञ्जरीकारेण जयन्तभट्टेन अभ्यासयोगात्प्रतिभाज्ञानोत्पत्तिः समुपवर्णिता। यथाह—

**मनः कारणकं ज्ञानं भावनाभ्याससंभवम् ।**

**भवति ध्यायतां धर्मे कान्तादाविव कामिनाम् ॥**

**यथानुवाकग्रहणे संस्थाभ्यासकल्पितः ।**

**स्थिरः करोति संस्कारः पाठस्मृत्यादिपाटवम्॥**

**तथैव भावनाभ्यासात् योगिनामपि मानसम् ।**

**ज्ञाने सकलविज्ञेयसाक्षात्कारे क्षमं भवेत्॥**

**प्रत्यूहभावनाभ्यासक्षपिताशेषकल्मषम् ।**

**योगिनान्तु मनः शुद्धं कमिवार्थं न पश्यति॥**

**अपि चानारतं ज्ञानमस्मदादेरपि क्वचित्॥**

**प्रमाणं प्रातिभं श्वो मे भ्राताऽऽगन्तेति दृश्यते॥** इति ।

शक्तिहीनानां काव्येषु अशक्तिपुरस्कृतदोषाः स्पष्टतया प्रकाशन्ते। अत एव ध्वनिकृता प्रोक्तम्-

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।**

**यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते॥** इति ।

तदित्थं शास्त्रादिप्रमाणसम्पन्नं प्रतिभात्वं मम्मटेन शक्त्यात्मनामीमांसकशक्त्यादिमतानुग्राहकतया निर्दिष्टम्। मम्मटभट्टेन काव्यकारणचर्चायां काव्यप्रकाशस्य प्रथमोल्लासे एवमुक्तम्, यथा—

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**

**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥** इति।

नास्ति तत्र नूतनता कापि। मम्मटेनात्र प्रतिभापरपर्यायरूपेण शक्तिः स्वीकृता। इयमेव खलु शक्तिः काव्यनिर्माणबीजम्। क्षेत्रजलादिषु सत्सु बीजाभावे अङ्कुरोत्पत्तेरभावात्प्रतिभापरपर्यायशक्तिरूपबीजाभावे काव्योत्पत्तिरपि न भवति।

अतः 'प्रसृतं वा उपहसनीयं स्यादि'ति यदुक्तं काव्यप्रकाशे तदपि न समीचीनम् । काव्यस्य उत्पत्तौ हेतुः शक्त्यादित्रयम्। हेतुरित्येकवचनस्य तात्पर्यमिदमस्ति यत् शक्त्यादित्रयाणां मिलितानामेव घटनिष्ठदण्डादिकारणकन्यायेन काव्यकारणत्वम्। यथा घटनिर्माणे दण्डादीनां मिलितानामेव कारणता। अन्यतराभावे न घट उत्पद्येत। एवं काव्येऽपि बोध्यम्। कारिकाया इदं तात्पर्यं, यच्छक्तिः प्रतिभापरपर्यायः। लोकशास्त्रकाव्याद्यवेक्षणात् प्रतिभा। काव्यं कर्तुं ये जानन्ति तेषां शिक्षया अभ्यास इत्यत्र हेतौ तृतीया। तथा च काव्यज्ञशिक्षाजन्यश्च अभ्यास इति त्रितयं काव्ये कारणम् ।

तस्मादत्र वृत्तौ **"त्रयः समुदिता न तु व्यस्तातस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः"** इति।

परन्तु एषु त्रिषु प्रतिभैव काव्यकारणमितरौ अदृष्टञ्च प्रतिभायाः कारणमिति नवीनालङ्कारिकः पण्डितराजजगन्नाथोऽभिप्रैति। जगन्नाथाचार्यस्तु रसगंगाधरे प्रथमानने काव्यलक्षणमुक्त्वा काव्यस्य कार्यत्वात् तस्य कारणं तावदुच्यते— **"तस्य च कारणं कविगता केवला प्रतिभा"** इति।

अत्र **'कविगता केवला प्रतिभा'** इत्यनेन काव्यनिर्माणे कविनिष्ठायाः कारयित्र्याः प्रतिभायाः प्राधान्यं सूचितम्। यद्यपि कविना भावितार्थस्यैवोल्लेखात् कवेः भावयित्रीप्रतिभाऽप्यावश्यकी, तथापि काव्यनिर्माणे चरमसामग्रीरूपेण कारयित्री प्रतिभैवोपयुज्यते। तां विना काव्यरचनायाः एवाप्रसरात्। तच्छब्दः काव्यपरः काव्यस्वरूपनिरूपणानन्तरं प्रस्तुतत्वात् अथवा पण्डितराजस्य बुद्धौ विषयत्वात् वा। यतो हि इतः पूर्वं काव्यलक्षणं प्रस्तुतं तत्रापि बहुप्रस्तुतमित्याशङ्कायां विकल्पान्तरमुक्तम्। एतच्च तात्पर्याधीनम्। प्रतिभायाः ज्ञानरूपत्वात् कवेरात्मनि समवेता सा इति अवगन्तव्या। गुणगुणिनोः समवायात् 'केवला' इति शब्देनैव प्रतिभाभिन्नं व्यवच्छिद्यते। एतत्सर्वं मनसि निधायाह पण्डितराजः **'कविगता केवला प्रतिभा'** इति।

का नाम प्रतिभा? अस्योत्तरे पण्डितराजेन निगदितं **"सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः"** इति। काव्यनिर्माणौपयिकी शब्दार्थोपस्थितिरेव प्रतिभा इति पण्डितराजलक्षितप्रतिभापदार्थः। ननु ज्ञा धातोः ज्ञानार्थकत्वमेव प्रसिद्धमिति प्रतिभेति शब्देन ज्ञानसामान्यं विवक्षितम्, उत ज्ञानविशेषो विवक्षितः? नाद्यः अतिव्याप्तत्वात्। अतः ज्ञानविशेष एव इत्यभिसन्धाय प्रतिभापदार्थ पारिभाषिकमाह - सा हि काव्यघटनानुकूलशब्दार्थोपस्थितिरिति। सा प्रतिभा हि काव्यस्य घटनायां निर्माणेऽनुकूलौ प्रयोजनौ यौ शब्दार्थौ तयोः उपस्थितिः। अनेन प्रतिभाया विषय उपदर्शितः शब्दार्थात्मकः।

'प्रतिभानम् इति प्रतिभा' इति व्युत्पत्त्या प्रतिभाशब्दः ज्ञानविशेषार्थकः। अत एव **"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता"** इति भट्टतौतेन, **"प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा"** इति अभिनवगुप्तेन च ज्ञानपरत्वेनैव प्रतिभास्वरूपं लक्षितम्। परं पूर्वोक्तप्रतिभालक्षणाऽपेक्षया पण्डितराजलक्षणेऽवगन्तव्यं किञ्चिन्महत्त्वमस्ति, यत्— शब्दार्थोपस्थितिरिति स्पष्टीकरणम्। नवनवोन्मेषशालिन्याः अथवा अपूर्ववस्तुनिर्माणक्षमाया वा प्रज्ञायाः शब्दार्थोपस्थापनकत्वे सत्येव काव्यकारणत्वम्, अन्यथा तु नास्त्येव। अत एव पण्डितराजेन 'शब्दार्थोपस्थितिः' इति प्रतिभायाः मौलिकं स्वरूपं दत्तम्। न च ज्ञानगतं नवनवोन्मेषशालित्वम्, अपूर्ववस्तुनिर्माणक्षमत्वं वा पण्डितराजलक्षणे न स्पष्टमस्तीति वाच्यम्। 'काव्यघटनानुकूल' इति पदेन तस्यैवार्थस्य संग्रहात्।

किञ्च पण्डितराजोक्तप्रतिभालक्षणे का नाम उपस्थितिः? इत्युक्ते— **"अत्र उपस्थितिशब्दः नव्यनैयायिकेषु स्मरणार्थकतया दृश्यते। अत्रापि स्मरणार्थकतया यदि उपस्थितिशब्दस्य परामर्शः, तदा पदार्थेषु नव्यता न स्यात्। स्मृतेषु पदार्थेषु नव्यताऽयोगात्। अतोऽयमुपस्थितिशब्दः आलङ्कारिकतन्त्रानुसारं विलक्षणज्ञानबोधकः"** इति पं. केदाननाथ ओझा महाशयः अभिप्रैति।

किं नाम प्रतिभात्वम्? इत्युक्ते पण्डितराजेन— **"तद्गतञ्च प्रतिभात्वं काव्यकारणतावच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वा खण्डम्"** इति अभिहितम्। तत्र प्रतिभात्वं जातिरखण्डोपाधिस्सखण्डोपाधिर्वेति चर्चा विद्यते।

ननु केवलार्थव्यवच्छेद्यं किमित्याकाङ्क्षायामुच्यते— **"तस्याश्च हेतुः क्वचिद् देवतामहापुरुषप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षण-व्युत्पत्तिः काव्यकरणाभ्यासौ"** इति। एतयोः निरासार्थं कविगता केवला प्रतिभेति जगन्नाथेनोक्तम् ।

ननु कुतोऽनयोः साक्षात् काव्यं प्रति न कारणत्वमिति चेत् व्यभिचारादिति ब्रूमः। तथा हि बालादेः तौ व्युत्पत्त्यभ्यासौ विनापि काव्योत्पत्तिदर्शनात् न हि बालादेः व्युत्पत्तौ अभ्यासे वा प्रवृत्तिः। तयोः बहुकालापेक्षितत्वात्। न च जन्मान्तरीयावनुवर्तेते येन नास्ति व्यभिचार इति वाच्यम्। कारणत्वे प्रबलप्रमाणाभावात् कार्यस्यान्यथाप्युपपत्तेश्च। यत्र बलवता प्रमाणेन कस्यचित् कारणत्वे सिद्धे पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयं धर्माधर्मादिकल्प्यम्। यथा निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरेदिति श्रुत्वा मङ्गलं विघ्नध्वंसकारणमिति सिद्धम्। कदाचित् मङ्गलाचरणं विनापि निर्विघ्नेन उद्दिष्टकार्यपरिसमाप्तिर्दृश्यते, कदाचित् कृते मङ्गलाचरणे सत्यपि निर्विघ्नपरिसमाप्तिर्न दृश्यते च। तत्र जन्मान्तरीयकृतपुण्यपापे कारणत्वेन स्वीक्रियते। अत्र तु तादृशप्रामाणिकतायाः आवश्यकता न विद्यते।

एतेन अदृष्टस्यापि न कारणता। तथा हि अदृष्टस्य कारणत्वे कञ्चित्कालं काव्यं कर्तुमशक्नुवतः कथमपि सञ्जातव्युत्पत्त्यभ्यासयोः काव्योत्पत्तिदर्शनात्। यद्यदृष्टं केवलं कारणं ततः पूर्वमपि कुतो न काव्यं जातम्? तत्त्वदृष्टेः काव्योत्पत्त्यनुकूलशक्तिप्रतिबन्धकमदृष्टान्तरं कल्पनीयं भवेत्। प्रतिबन्धकाभावस्यापि कारणताकोटी निवेश्यत्वात्। अत्रोच्यते प्रतिबन्धकमदृष्टान्तरं कथं निवर्तते? उत्तेजकादिति चेन्न। उत्तेजकान्तरकल्पने प्रमाणाभावात्। अपि चादृष्टयोः प्रागभावध्वंसादिकल्पने गौरवञ्च। अतोऽदृष्टस्य व्युत्पत्त्यभ्यासयोश्च न काव्यकारणता।

एतयोः काव्यकारणतायां दूषितायामेतत्प्रयोगः प्रतिभेति मता। एवं च प्रतिभायाः कारणं क्वचिददृष्टं क्वचिद् व्युत्पत्त्यभ्यासौ च। नन्वेवमन्यतरोत्पन्नायां प्रतिभायामन्यतरत्कारणं नास्तीति व्यभिचार इति चेन्न, वैलक्षण्यात्। तथा हि अदृष्टजन्यप्रतिभायां यद्वैलक्षण्यं विद्यते, तन्नास्ति व्युत्पत्त्यभ्यासवशाज्जातप्रतिभायाम्। लोके हि कारणगतवैलक्षण्यात् कार्येऽपि वैलक्षण्यं दृश्यते खलु एवं प्रतिभावैलक्षण्ये सिद्धे काव्येऽपि वैलक्षण्यं देयम्। अतो न तत्रापि व्यभिचारः। अव्यवहितोत्तरवर्तित्वविशेषणेनापि व्यभिचारः वारयितुं शक्यः। तथा हि अदृष्टव्यवहितोत्तरवर्तिप्रतिभायाम् अदष्टं कारणमित्येवमन्यत्रापि बोध्यम्।

किञ्च काव्यप्रतिभयोः कार्यकारणभावविषयेऽपि काचिज्जागरूकता स्वीकर्तव्या यत्—महापुरुषप्रसादादिजन्यादृष्टजन्यप्रतिभायाः तादृशकाव्यं प्रत्येव कारणत्वम्। व्युत्पत्त्यभ्यासजन्यप्रतिभायाः अपि तादृशकावमेव कारणत्वं स्वीकर्तव्यम्। अन्यथा द्वयोरपि काव्य-कारणत्वप्रतिपत्त्या व्यतिरेकव्यभिचारः प्रसज्येत। अतः काव्यविशेषं प्रति प्रतिभाविशेषस्यैव कारणत्वम् अवगन्तव्यम्।

न च सतोरपि व्युत्पत्त्यभ्यासयोः यत्र न प्रतिभोत्पत्तिः तत्र कारणतसत्त्वेऽपि कार्यानुत्पत्तिलक्षणान्वयव्यभिचार इति वाच्यम्। विलक्षणव्युत्पत्त्यभ्यासयोरेव प्रतिभाहेतुत्वेन स्वीकारात् तादृशस्थले व्युत्पत्त्यभ्यासयोः वैलक्षण्ये मानाभावेन विलक्षणव्युत्पत्त्यभ्यासयोरभावात् कारणाभावेन कार्यानुत्पत्तेः न अन्वयव्यभिचारः। यद्वा पापविशेषस्य प्रतिबन्धकल्पनात् प्रतिबन्धकसद्भावे च कार्योत्पादस्य क्वाप्यदृष्टत्वात् न दोषः। न हि प्रतिबन्धकाभावस्य कारणत्वकल्पनम् अस्मन्मतमात्रसिद्धम्। तच्च शक्त्यादित्रितयहेतुतावादिनः शक्तिमात्रहेतुतावादिनश्चाविशिष्टम्। कथमन्यथा प्रतिवादिना मन्त्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तम्भे प्रणीतानेकप्रबन्धस्यापि कवेः काव्यानुदयदर्शनम्। अतश्च पापविशेषस्य प्रतिबन्धकत्वकल्पनायाः सर्वमतसिद्धत्वात् केवलव्युत्पत्त्यभ्यसयोः प्रतिभाहेतुत्वमपि निर्बाधम्।

इत्थञ्च काव्ये कारणं प्रतिभामात्रमिति सम्पन्नम्। तच्च उपादानकारणम्। एवं रसगङ्गाधरकारेण काव्यकारणत्वेन निर्दिष्टा या प्रतिभा सा नास्ति नूतना काचिदिति भामहादीनां मतपर्यालोचनया ज्ञातपूर्वमेव। इति शम्।

## अन्तटीका सन्दर्भग्रन्थसूची च—


काव्यादर्शः १/१०३, सम्पा. डा. जमुना-पाठकः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी २००५.

काव्यालङ्कारसूत्रवृत्तिः १/३/१, व्याख्या. श्रीहरगोविन्द-शास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २०१५.

रुद्रटकृतः काव्यालङ्कारः १/१/४, व्याख्या. डा. सत्यदेव-चौधरी, वासुदेव प्रकाश, दिल्ली १९६५.

भामहकृतः काव्यालङ्कारः १/५, भाष्य. डा. रामानन्द-शर्मा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी २०१३.

ध्वन्यालोकः ३

काव्यादर्शः १/१०४.

वाक्यपदीयम् २/१४३, १४७, १४९, १५०, १५२॥ सम्पा. डा. सुधाकरमिश्रः, दि बनारस मर्केन्टाइल कम्पनी, कोलकाता २०१५.

न्यायमञ्जरी पृ ९७,९८ काशी सान्स्क्रिट सीरीज् १०६ – १९७१.

ध्वन्यालोकः ३/पृ. ३४६, सम्पा. आचार्यजगन्नाथपाठकः, चौखम्बा – विद्याभवनम्, २०११.

काव्यप्रकाशः १/३, सम्पा. हरिशङ्करशर्मा, चौखम्बा-प्रकाशनम्, वाराणसी २०१३.

काव्यप्रकाशः १/पृ. ४.

रसगङ्गाधरः १/पृ. २७, व्याख्या. पं. मदनमोहन- झा, चौखम्बा विद्याभवनम्, वाराणसी २०१८.

तत्रैव।

तत्रैव।

रसगङ्गाधरः १/पृ. २९॥